# Shri Mantramatrika Ashtakam

# શ્રીમન્ત્રમાતૃકાષ્ટકમ્

## Document Information

Text title : Shri Mantramatrika Ashtakam

File name : shrImantramAtRRikAShTakam.itx

Category : deities_misc, ayyappa, aShTaka

Location : doc_deities_misc

Proofread by : Mohan Chettoor

Latest update : October 8, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 8, 2022

*sanskritdocuments.org*

# શ્રીમન્ત્રમાતૃકાષ્ટકમ્

ઘ્રૂઙ્કારાઙ્કિતમન્ત્રગં શરણદં સર્વાર્થસિદ્ધિપ્રદં
    શાઙ્કર્યાદિરમેશલાલિતતનું સઙ્કીર્તનાકર્ષિતમ્ ।
કાલામ્ભોદસમપ્રભં કરતલૈર્દિવ્યાયુધં બિભ્રતં
    વન્દે શ્રીહરિશઙ્કરાત્મજમહં કારુણ્યવારાન્નિધિમ્ ॥ ૧॥

નમ્રાણામખિલાર્થદં મુનિજનૈઃ સંસેવિતં સર્વદા
    નિત્યાનન્દસુખાઞ્ચિતં મણિગણેનાલઙ્કૃતં સુન્દરમ્ ।
સર્વારિઘ્નમશેષશોકશમનં કાન્તારમધ્યસ્થિતં
    વન્દે પાપનિવારણૈકનિરતં પૂર્ણેન્દુબિમ્બાનનમ્ ॥ ૨॥

મત્તેભોપરિસંસ્થિતં ત્રિનયનં કાન્તદ્વયાલિઙ્ગિતં
    સત્ત્વાદિત્રિગુણાત્મકં કલિમલૌઘારણ્યદાવાનલમ્ ।
વિત્તેશાશ્રિતમમ્બિકાહૃદયગં ભક્તૌઘભૂતિપ્રદં
    વન્દે પાવનભક્તકીર્તિતવિભું કલ્યાણકલ્પદ્રુમમ્ ॥ ૩॥

પદ્માદુત્તમપુષ્પપૂજિતપદં નીલામ્બરાલઙ્કૃતં
    પદ્માન્તર્ગતરાજિતં વરગણાન્ દાતું સદાપ્યુત્સુખમ્ ।
દિવ્યૈર્ભૂતગણૈર્વૃતં રિપુહરં ચણ્ડાટ્ટહાસપ્રિયં
    વન્દે દેવમુનીન્દ્રવન્દિતપદં સર્વાપદં શાન્તિદમ્ ॥ ૪॥

રાગદ્વેષતમોવિહીનસુજનૈર્ભક્ત્યા સદા સેવિતં
    રોગાદ્યુદ્ભટદોષસઙ્ઘદલનં વાગીશ્વરીલાલિતમ્ ।
ધર્માધર્મવિચિન્તનૈકનિરતં સર્વાર્થસમ્પાદકં
    વન્દે સુન્દરસૂનુમદ્ભુતમહં મન્દારહારોજ્વલમ્ ॥ ૫॥

યન્ત્રારાધિતદૈવતં પરપદપ્રાપ્ત્યુત્સુકાભીષ્ટદં
    મન્ત્રોચ્ચારણતુષ્ટમાનસમહં શ્રીભૂતનાથાકૃતિમ્ ।
સ્ફુર્જત્પત્રસુવર્ણકુણ્ડલધરં સન્તાનવૃક્ષોપમં
    વન્દે વન્દિતલોકસર્વવરદં સન્તાનસૌખ્યપ્રદમ્ ॥ ૬॥

ગોમૃસ્થાનનિવાસિનં ગુરુવરૈરારાધિતં સર્વગં
 દીપ્યદ્દિવ્યવિભૂષણૌઘવિમલં શોણામ્બરાલઙ્કૃતમ્ ।
પ્રાપ્યસ્થાનનિવાસિનં નૃપવરૈઃ સંસેવ્યમાત્તાદરં
 વન્દે શાશ્વતધર્મરક્ષણવિધાવૃગ્વેદરૂપં પરમ્ ॥ ૭॥

પત્રેમન્ત્રાન્ત્યકવર્ણશોભિતતનું વેદાર્થવાક્યોજ્જ્વલં
 વામાઙ્ગસ્થિતપૂર્ણયેતરલસચ્છ્રીસત્યકેનાશ્રિતમ્ ।
દિવ્યં ભક્તજનૈકનિરતં સત્યસ્થિતં સર્વદા
 વન્દે ધ્રૂમ્પદમન્ત્રવર્ણસુભગં રત્નપ્રભાભાસુરમ્ ॥ ૮॥

ઇતિ શ્રીમન્ત્રમાતૃકાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

*Shri Mantramatrika Ashtakam*
pdf was typeset on October 8, 2022

Please send corrections to *sanskrit@cheerful.com*